# श्री वेंकटेश सुप्रभातम्

कौसल्या सुप्रजाराम पूर्वासंध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥१॥

उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडद्वज ।
उत्तिष्ठ कमलाकांत त्रैलोक्यं मंगलं कुरु ॥२॥

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहरदिव्यरूपे ।
श्री स्वामिनि श्रितजनप्रियदानशीले
श्री वेंकटेशदयिते तव सुप्रभातम् ॥३॥

तव सुप्रभातमरविंदलोचने
भवतु प्रसन्न मुखचंद्रमंडले ।
विधिशंकरेंद्र वनिताभिवंदिते
वृषशैलनाथदयिते दयानिधे ॥४॥

अत्र्यादिसप्त ऋषयस्समुपास्य संध्या
आकाशसिंधुकमलानि मनोहरणि ।
अदाय पादयुगमर्चयितुं प्रपन्नाः
शेषद्रिशेखरविभो तव सुप्रभातम् ॥५॥

पंचाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवंति ।
भाषापतिः पठति वासरशुद्धि मारात्
शेषद्रिशेखरविभो तव सुप्रभातम् ॥६॥

ईषत्प्रफुल्लसरसीरुहनारिकेळ
पूगद्रुमादिसुमनोहरपालिकानां ।
आवाति मंदमनिलस्सह दिव्यगंधैः
शेषद्रिशेखरविभो तव सुप्रभातम् ॥७॥

उन्मील्य नेत्रयुगमुत्तमपंजरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केळिशुकाः पठंति
शेषद्रिशेखरविभो तव सुप्रभातम् ॥८॥

तंत्रीप्रकर्षमधुरस्वनया विपंच्या
गायत्यनंतचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचारुरम्यं
शेषद्रिशेखरविभो तव सुप्रभातम् ॥९॥

भृंगावली च मकरंदरसानुविद्ध
झंकारगीतनिनदै स्सह सेवनाय ।
निर्यात्युपांतसरसीकमलोदरेभ्यः
शेषद्रिशेखरविभो तव सुप्रभातम् ॥१०॥

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमंथनतीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुंभाः
शेषद्रिशेखरविभो तव सुप्रभातम् ॥११॥

पद्मेश मित्रशतपत्र गताळिवर्गाः
हर्तुं श्रियं कुवलयस्य निजांगलक्ष्म्या ।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषद्रिशेखरविभो तव सुप्रभातम् ॥१२॥

श्री मन्नभीष्ट वरदाखिललोकबंधो
श्री श्रीनिवासजगदेकदयैकसिंधो ।
श्री देवतागृहभुजांतरदिव्यमूर्ते
श्री वेंकटाचलपते तव सुप्रभातं ॥१३॥

श्री स्वामिपुष्करिणिकाप्लवनिर्मलांगाः
श्रेयोऽर्थिनो हरविरिंचि सनंदनाद्याः ।
द्वारे वसन्ति परवेत्रहतोत्तमांगाः
श्री वेंकटाचलपते तव सुप्रभातं ॥१४॥

श्री शेषशैल गरुडाचल वेंकटाद्रि
नारायणाद्रि वृषभाद्रि वृषाद्रिमुख्याम् ।
आख्यां त्वदीयवसतेरनिशं वदंति
श्री वेंकटाचलपते तव सुप्रभातं ॥१५॥

सेवापराश्शिवसुरेशकृशानुधर्म
रक्षोंबुनाथपवमानधनाधिनाथाः ।
बद्धांजलि प्रविलसन्निजशीर्षदेशाः

श्री वेंकटाचलपते तव सुप्रभातं ॥१६॥

दाटीषु ते विहगराज मृगाधिराज
नागाधिराज गजराज हयधिराजाः ।
स्वस्वाधिकार महिमाधिकमर्थयन्ते
श्री वेंकटाचलपते तव सुप्रभातं ॥१७॥

सूर्येंदुभौम बुधवाक्पति काव्य सौरि
स्वर्भानुकेतु दिविषत्परिषत्प्रधानाः ।
त्वद्दासदास चरमावधिदास दासाः
श्री वेंकटाचलपते तव सुप्रभातं ॥१८॥

त्वत्पादधूळिभरित स्फुरितोत्तमांगः
स्वर्गापवर्ग निरपेक्ष निजांतरंगाः ।
कल्पागमाकलनयाऽऽकुलतां लभन्ते
श्री वेंकटाचलपते तव सुप्रभातं ॥१९॥

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः ।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्री वेंकटाचलपते तव सुप्रभातं ॥२०॥

श्री भूमिनायक दयादिगुणामृताब्धे
देवादिदेव जगदेकशरण्यमूर्ते ।
श्री मन्ननंतगरुडदिभिरर्चितांघ्रे
श्री वेंकटाचलपते तव सुप्रभातं ॥२१॥

श्री पद्मनाभ पुरुषोत्तम वासुदेव
वैकुंठ माधव जनार्धन चक्रपाणे ।
श्री वत्सचिह्न शरणागत पारिजात
श्री वेंकटाचलपते तव सुप्रभातं ॥२२॥

कंदर्पदर्पहरसुंदरदिव्यमूर्ते
कांताकुचांबुरुहकुट्मललोलदृष्टे ।
कल्याणनिर्मलगुणाकरदिव्यकीर्ते
श्री वेंकटाचलपते तव सुप्रभातं ॥२३॥

मीनाकृते कमठ कोल नृसिंह वर्णिन्

स्वामिन् परश्वथ तपोधन आमचंद्र ।
शेषांशराम यदुनंदन कल्किरूप
श्री वेंकटाचलपते तव सुप्रभातं ।।२४।।

विलालवंगघनसारसुगंधतीर्थं
दिव्यं वियत्सरसि हेमघटेषु पूर्णम् ।
धृत्वाऽद्य वैदिकशिखामणयः प्रहृष्टा
स्तिष्ठन्ति वेंकटपते तव सुप्रभातं ।।२५।।

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयंति निनदैः ककुभोविहंगाः ।
श्री वैष्णवास्सततमर्थित मंगळास्ते
धामाश्रयंति तववेंकट सुप्रभातम् ।।२६।।

ब्रह्मादयस्सुरवरास्समहर्षयस्ते
संतस्सनंदन मुखास्त्वथ योगिवर्याः ।
धामांतिके तव हि मंगळवस्तुहस्ताः
श्री वेंकटाचलपते तव सुप्रभातं ।।२७।।

लक्ष्मीनिवास निरवद्य गुणैकसिंधो
संसारसागरसमुत्तरणैकसेतो ।
वेदांतवेद्य निज वैभव भक्तभोग्य
श्री वेंकटाचलपते तव सुप्रभातं ।।२८।।

इत्थं वृषाचलपते रिह सुप्रभातम्
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरंगभाजां
प्रज्ञांपरार्थसुलभां परमां प्रसूते ।।२९।।

इंति श्री वेंकटेश सुप्रभातम् समाप्तम्

श्री वेंकटेश स्तोत्रम्

कमलाकुचचूचुककुंकुमतो नयतारुणितातुलनीलतनो ।
कमलायतलोचन लोकपते विजयीभव वेंकटशैलपते ।।१।।

सचतुर्मुखषण्मुखपंचमुख प्रमुखाखिलदैवतमौळिमणे ।
शरणागतवत्सल शौर्यनिधे परिपालाय मां वृषशैलपते ।।२।।

अतिवेलतया तव दुर्विषहै रनुवेलकृतैरपआधषतैः ।
भरितं त्वरितं वृषशैलपते परया कृपया परिपाहि हरे ।।३।।

अधिवेंकटशैलमुदारमते र्जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः कमलादयितान्न परं कलये ।।४।।

कलवेणुरवावशगोपवधू शतकोटिवृतात् स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात् सुखदात् वसुदेवसुतान्न परं कलये ।।५।।

अभिराम गुणाकर दाशरथे जगदेक धनुर्धरधीरमते ।
रघुनायक राम रमेश विभो वरदो भव देव दयाजलधे ।।६।।

अवनीतनया कमनीयकरं रजनीकरचारु मुखंबुरुहम् ।
रजनीचर राज तमो मिहिरं महनीय महं रघुराममये ।।७।।

समुखं सुहृदं सुलभं सुखदं स्वनुजं च सुकायममोघशरं ।
अपहाय रघूद्वहमन्यमहं न कथंचन कंचन जातुभजे ।।८।।

विनावेंकटेशं न नाथो न नाथः सदावेंकटेशं स्मरामि स्मरामि ।
हरे वेंकटेश प्रसीद प्रसीद प्रियं वेंकटेश प्रयच्च प्रयच्च ।।९।।

अहं दूरतस्ते पदांभोजयुग्म प्रणमेच्चयाऽगत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवा फलं त्वं प्रयच्च प्रयच्च प्रभो वेंकटेश ।।१०।।

अज्ञानिना मया दोषा न शेषान् विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं शेषशैल शिखामणे ।।११।।

इंतु श्री वेंकटेश स्तोत्र समाप्तम्

श्री वेंकटेश प्रपत्तिः

ईशानां जगतोऽस्य वेंकतपते विष्णोः परं प्रेयसीं ।
तद्वक्षस्थलनित्यवासरसिकां तत् क्षांति संवर्धिनीम् ।।
पद्मालंकृत पाणिपल्लवयुगां पद्मासनस्थां श्रियं ।
वात्सल्यादि गुणोज्वलां भगवतीं वंदे जगन्मातरं ।।१।।

श्रीमन् कृपाजलनिधे कृतसर्वलोक ।

सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ॥
स्वामिन् सुशील सुलभाश्रित पारिजात ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥२॥

अनूपुरार्पित सुजात सुगंध पुष्प ।
सौरभ्य सौरभकरौ समसन्निवेशौ ॥
सौम्यौ सदाऽनु भवनेऽपि नवानुभाव्यौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥३॥

सद्योविकासि समुदित्वर सांद्रराग ।
सौरभ्य निर्भर सरोरुह साम्यवार्ताम् ॥
सम्यक्षु साहसपदेशु विलेखयन्तौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥४॥

रेखामय ध्वज सुधाकल शातपत्र ।
वज्रांकुशांबुरुह कल्पक शंकचक्रैः॥
भव्यैरलंकृततलौ पर तत्व चिह्नैः ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥५॥

ताम्रोदरद्युति पराजित पद्मरागौ ।
बाह्यैर्महोभिरभि भूत महेंद्रनीलौ ॥
उद्यन्न खांशुभिरुदस्त शशंकाभासौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥६॥

सप्रेमभीति कमलाकर पल्लवाभ्यां।
संवाहनेपि सपदि क्लममादधानौ ॥
कांताववाङ्मन सगोचर सौकुमार्यौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥७॥

लक्ष्मीमहीत दनुरूप निजानुभाव ।
नीलादि दिव्यमहिषीकर पल्लवानाम् ॥
आरुण्यसंक्रमणतः किल सांद्ररागौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥८॥

नित्यानमद्विधि शिवादिकिरीटकोटि ।
प्रत्युप्रदीप्त नवरत्न महःप्ररोहैः ॥
नीराजनाविधि मुदारमुपादधानौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥९॥

विष्णोः पदे परम इत्युधितप्रशंसौ ।
यौ मध्वौत्स इति भोग्यतयाऽप्युपात्तौ ॥
भूयस्तथेति तव पाणितलप्रधिष्टौ ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥१०॥

पार्थाय तत्सदृश सारथिना त्वयैव ।
या दर्शितौ स्वचरणौ शरणं व्रजेति ॥
भूयोऽपि मह्यमिह तौ करदर्शितौ ते ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥११॥

मन्मूर्ध्नि काळियफने विकटाटवीशु ।
श्री वेंकटाद्रि शिखरे शिरसि श्रुतीनाम् ॥
चित्तेऽप्यनन्यमनसां सममाहितौ ते ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥१२॥

आम्लन हृष्य दवनीतल कीर्ण पुष्पौ ।
श्री वेंकटाद्रि शिकराभरणायमानौ ॥
आनंदिताखिल मनोनयनौ तवैतौ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥१३॥

प्रायः प्रपन्नजनता प्रथमावगाह्यौ ।
मातुः स्तनाविव शिशोरमृतायमानौ ॥
प्राप्तौ परस्पुर तुलामतुलांतरौ ते ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥१४॥

सत्वोत्तरै स्सतत सेव्यपदांभुजेन ।
संसारतारक दयार्द्रदृगंचलेन ॥
स्ॐयोपयंत्रुमुनिना मम दर्शितौ ते ।
श्री वेंकटेश चरणौ शरणम् प्रपद्ये ॥१५॥

श्रीश श्रीया घटिकया त्वदुपायभावे ।
प्राप्ये त्वयि स्वयमुपेतया स्फुरंत्या ॥
नित्याश्रिताय निर्वद्यगुणाय तुभ्यं ।
स्यां किंकरो वृशगिरीश न जातु मह्यम् ॥१६॥

श्री वेंकटेश मंगळाशासनम्

श्रीयः कांतय कल्याणनिधये निधयेऽर्थिनाम् ।
श्री वेंकटनिवासय श्रीनिवासय मंगलम् ॥१॥

लक्श्मी सविभ्रमालोक-सुभ्रू विभ्रम चक्षुषे ।
चक्षुषे सर्वलोकानं वेंकटेशाय मंगलम् ॥२॥

श्री वेंकटाद्रि शृंगाग्र-मंगळा भरणांघ्रयेः।
मंगळानां निवासाय वेंकटेशाय मंगलम् ॥३॥

सर्वावयव सौंदर्य संपदा सर्वचेतनाम् ।
सदा सम्मोहनायस्तु वेंकटेशाय मंगलम् ॥४॥

नित्याय निरवद्याय सत्यानंद चिदात्मने ।
सर्वांतरात्मने श्रीमद् वेंकटेशाय मंगलम् ॥५॥

स्वतस्सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेंकटेशाय मंगलम् ॥६॥

परस्मै ब्रह्मणे पूर्ण कामाय परमात्मने ।
प्रयुंजे परतत्वाय वेंकटेशाय मंगलम् ॥७॥

अकालतत्व मश्रान्त मात्मनामनु-पश्यताम् ।
अतृप्त्य मृथ रूपाय वेंकटेशाय मंगलम् ॥८॥

प्रायस्स्वचरनौ पुंसां शरण्यत्वेन पाणिना ।
कृपयाऽऽदिशते श्रीमद्-वेंकटेशाय मंगलम् ॥९॥

दयामृत तरंण्या स्तरंगैरिव शीतलैः ।
अपांगैस्सिंचते विश्वं वेंकटेशाय मंगलम् ॥१०॥

स्रग्भूषांबर हेतीनां सुषुमाव हमुर्तये ।
सर्वार्ति शमनायस्तु वेंकटेशाय मंगलम् ॥११॥

श्री वैकुंठविरक्ताय स्वामि पुष्करिणी तटे ।
अमया अममणाय वेंकटेशाय मंगलम् ॥१२॥

श्रीमद् सुंदरणामातृ मुनिमानसवसिने ।
सर्वलोक निवासाय श्रीनिवासाय मंगलम् ॥१३॥

मंगळाशासन परैर्मदाचार्य पुरोगमैः ।
सर्वैश्च पूर्वैराचार्यै स्सत्कृतायस्तु  मंगलम् ॥१४॥